अथचित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।

अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥ १२.९ ॥

athacittaṁ samādhātuṁ na śaknoṣi mayi sthiram |
abhyāsayogena tato māmicchāptuṁ dhanañjaya || 12.9||

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।

मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १२.१० ॥

abhyāse'pyasamartho'si matkarmaparamo bhava |
madarthamapi karmāṇi kurvansiddhimavāpsyasi || 12.10||

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।

सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ १२.११ ॥

athaitadapyaśakto'si kartuṁ madyogamāśritaḥ |
sarvakarmaphalatyāgaṁ tataḥ kuru yatātmavān || 12.11||

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।

ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनन्तरम् ॥ १२.१२ ॥

śreyo hi jñānamabhyāsājjñānāddhyānaṁ viśiṣyate |
dhyānātkarmaphalatyāgastyāgācchāntiranantaram || 12.12||